॥अथविनायकशांतिः॥पत्र१९

LIBRARY
BOMBAY
ASIATIC SOCIETY

॥१॥ श्रीगणेशायनमः॥अथोपनयनप्रयोगंवक्तुंद्वितीयजन्मसदृक्षेनेतरकर्माधिकारसाधकत्वेनेतरसंस्कारस्तस्यवैशिष्ट्यात्तत्फलप्राप्तौविघ्नपरिहारायविनायकशांतिरुच्यते॥ तत्रयाज्ञवल्क्यः॥ एवंविनायकंपूज्यग्रहांश्चैवविधानतः॥ कर्मणांफलमाप्नोतिश्रियंप्राप्नोत्यनुत्तमामिति॥ बृहस्पतिरपिशरः॥ चतुर्थ्यांशुक्लपक्षेतुश्रवणेचोत्तरेतथा॥ पुण्यार्थंसर्वसिध्यर्थंकुर्याच्छांतिंविनायकीं॥ नक्षत्रांतराणिविद्युधर्मे॥ इमांशांतिंप्रकुर्वीतनक्षत्रेपुष्याश्वयुक्सौम्यवैष्णवान्यमिमेषुभे॥ नक्षत्रेचमुहूर्तेचमैत्रेवाह्नि ॥१॥

स्नदैवतइति॥ भविष्ये॥शुक्लपक्षेचतुर्थ्यांतुवारेणाधिषणस्यच॥तिष्यंचवीरनक्षत्रेतस्यैवपुरतोन्नरेति॥एतद्वचनमुदाहृत्यापरार्कःतच्छीकामस्यविनायकस्नपनविषयं॥उपस्थविषयंतुपुण्याहविधानंउपस्थस्यबिलंबायोगात्॥ धिषणोगुरुः॥ तस्यैवविनायकस्येत्यर्थइतिउपनयनादिफलमाप्नोत्येक्रियमाणायामपिविनायकशांतौउपनयनकालाविरोधेनसंभवत्कालोपसंग्रहःकार्योनितुतद्विरोधेनेति बोध्यं॥ ॥अथप्रयोगः॥ ॥उक्तकालेपवित्रपाणि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

राधिकारीप्राणानायम्यदेशकालौसंकीर्त्यास्यकुमारस्योपनयनकर्म
णोनिर्विघ्नताफलसिध्यर्थं विनायकशांतिंकरिष्येइतिसंकल्पातदंग
त्वेनगणेशपूजनादिनांदीश्राद्धांतंकृत्वाआचार्यवरणंकुर्यात्॥आचा
र्यस्तुयथास्व॰ चतुर्णामृत्विजांश्चअस्ययागस्य॰॥पंचानांवस्त्रादिभिः
पूजनांततआचार्योपि पवित्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्या
चार्यकर्मकरिष्यइतिसंकल्प्यदत्रसंस्थितमितिसर्षपान्विकीर्यस्रु ॥२॥
चीवइतिअग्निं भुवं प्रोक्ष्यस्वस्ययनंतार्क्ष्यइति मंत्रद्वयेनप्रार्थ्यप्रति

माद्यस्याग्न्युतारणंकृत्वामध्यदेशेशुचौसुलिप्तेस्थंडिलेपंचवर्णैःपि
ष्टैःस्वस्तिकंकृत्वातस्मि न्प्राचीनग्रीवमुत्तरलोमानंदुहरुक्मरुक्मवाच
मोस्तीर्यतत्रश्रीपर्णीपीठंनिधायतत्रश्वेतवस्त्रसाच्छाद्यपूर्वादिक्रमेणच
तसृषुदिक्षुस्वस्तिकानिकृत्वातेषिमान्यदार्यान्कांडानुसमयेनकुर्या
त्॥महीद्यौःपृथिवीत्यृचा॥ओषधयःधान्यंनिक्षिप्य॥आकलशेषुएक
रूपमक्षणंकलशंनिधायेमंमेगंगइतिसंगमोदकेनकृतोदकेनवापू
र्य॥उद्धृतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहरमेपापंयन्म

यादुष्कृतंकृतमिति॥अश्वस्थानगजस्थानवल्मीकह्रदसंगमभ्रदोनिक्षि
प्यगंधद्रव्याणिचंदनागरुकेसरकस्तूरिकर्पूरगोरोचनाःप्रक्षिप्यतू
घ्नींगुग्गुलंचप्रक्षिप्ययाओषधीरितिसर्वौषधीःओषधयःसमिति
यवान्॥कांडात्कांडादितिदूर्वाःअश्वत्थेवइतिपंचपल्लवान्॥याःफ
लिनीरितिफलं॥सहिरण्यानीतिपंचरत्नानिहिरण्यरूपमितिहिर
ण्यं॥युवासुवासाइतिवस्त्रेणावेष्ट्यचंदनमालाभूषितंकृत्वापूर्णो ॥३॥
दर्वीतिपूर्णपात्रंनिधायकलशस्यमुखेविष्णुकंठेरुद्रःस॰॥यजमा

नस्यदुरितक्षयकारकाः॥सर्वेस॰काः॥देवदानव॰॥इतिचपठेत्॥द
क्षिणपश्चिमोत्तरकलशोक्तिर्यंतेकर्मण्याचार्येणकृतेचत्वा ऋत्विजः ऋ
पवित्रपाणयआचम्यप्राङ्मुखास्तत्वायामीतिवरुणमावाह्यषोडशो
रुपचारैरभ्यर्च्यपूर्वकलशेश्रीसूक्तंदक्षिणेमहि त्रीणांपश्चिमकल
शेनहितेस्तत्रंउत्तरकलशेवामदेव्यानोभद्राइतिबहुचानमोवाचे
द्रान्नोवातःपवतामितितैत्तिरीयाःपठेयुः॥तदेवाचार्योभद्रासनप्रा
ग्देशेहोमार्थंस्थंडिलंकृत्वातदेशान्यांवेद्यांपीठेवावस्त्रादौप्रतिमा

दये विनायकांबिकयोरावाहनादि भिर्नैवेद्यांतैरुपचारैः पूजांकुर्यात्॥ तन्मंत्रौ॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तन्नोदंतिः प्रचोदयात्॥ सुभगायै विद्महे काममालिन्यै धीमहि॥ तन्नोगौरीप्रचोदयात्॥ अपरार्के हेमाद्रिमते॥ प्रतिमयोरुत्तरतो नमोंतै र्नाममंत्रैरन्या देवताआवाह्य षोडशोपचारैः पूजयेत्॥ मंत्राः॥ व्योमकेशायनमः॥ पार्वत्यै०भीमजाय०कृष्णस्यपित्रे॥ अर्काय०आराय०सिताय०धिषणाय०क्लेदपुत्राय०कोणाय०लम्बव०विधुंतुदाय०केतवे०बाहुलेय०नंदकस्यधारिणे०॥१५॥ ततोहोमार्थंस्थंडिलेयजमानंगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वाधायतत्रचसुचौआज्येनेत्यंतेनप्रधानं॥ मितं॥ संमितं॥ इदमेकंकटंकटं॥ कूष्मांडंराजपुत्रं०व्योमकेशं०नंदकस्यधारिणं॥ एकैकयाचर्वाहुत्यारोषेणेत्यादि॥ निर्वापकालेमितायत्त्वेत्यादिभिरेकविंशतिमंत्रैःप्रत्येकंचतुरादत्तैश्चतुरशीतिवारंनिरूप्यतथैवप्रोक्ष्यबर्हिष्यासादनांतंकृत्वागव्याज्यलोलीकृतेनासिक्यार्थपिष्टेनोद्वर्तितांगस्यसर्वौषधैःसर्वगंधैश्चविलिप्तसिरसोयजमानस्यमंगलघोषेपावस्त्रा

छादितोक्तपीठात्मक भद्रासनोप र्यु पवेशनंकार्यं।उपवेश
नो त्तर मुद्वर्त्तनंमदनरत्नोक्तं तुमितास्परामहार्णवादिनिबंधादिरो
धादुपेक्ष्यं॥सर्वौषधानिप्रियंगुनागकेसराद्दानिमितास्परायां।अप
राकैरुद्भवसिष्ठः॥वालाचशंखपुष्पीचकुष्ठीचैवंचातया॥नागके व
सर-चूर्णंतुसर्वौषधि गणो मृगोइति॥छंदोगपरिशिष्टेतु।कुष्ठंमां
सीहरिद्रेद्वेशैलेयंरजनीद्वयं॥सटी-चंपकमुस्ताचसर्वौषधिगणा ॥५॥
स्मृतइति॥सर्वगंधामदनरत्ने॥कुंकुमागरुकर्पूरकस्तूरीचंद

नंतथा॥जातीफलमितिप्रोक्तासर्वगंधाःसदाबुधैरिति॥हेमाद्रौगा
रुडे॥कर्पूरंचंदनंदर्पःकुंकुमंचसमांशके॥सर्वगंधमितिप्रोक्तंस
मस्तमुखवल्लभमिति॥भद्रासनमुपविष्टोयजमानऋत्विक्भि
र्गृह्योक्तविधिनास्वस्तिवाचनंकुर्यात्॥तत्रजीवत्पतिपुत्राभिःसुवे
षाभिस्त्रीभिर्नीराजितस्ताभ्यःसकंचुकानिवस्त्राणिदद्यात्॥तत
आचार्योयजमानंदक्षिणतउदङ्मुखंस्थिष्ठन्ऋत्विग्दत्तपूर्वादिकुं
भत्रयेणऋमेणैकैकमंत्रेणस्नपयेत्॥सहस्राक्षंशतधारमृषिभिः

छादितोक्तपीठात्मक भद्रासनोप र्यु पवेशनंकार्यं।उपवेश
नो त्तर मुद्वर्त्तनंमदनरत्नोक्तं तुमितास्सरामहार्णवादिनिबंधादिरो
धादुपेक्ष्य॥सर्वौषधानिप्रियंगुनागकेसरादीनिमितास्सरायां।अप
रार्के वृद्धवसिष्ठः॥वालाचशंखपुष्पीचकुष्ठीचैवंचातया॥नागके व
सर-चूर्णंतुसर्वौषधि गणो मृगोइति।छंदोगपरिशिष्टेतु।कुष्ठमां
सीहरिद्रेद्वेशैलेयंरजनीद्वयं॥सटीचंपकमुस्ताचसर्वौषधि गणा ॥५॥
स्मृतइति॥सर्वगंधामदनरत्ने॥कुंकुमागरुकर्पूरकस्तूरीचंद

नंतथा॥जातीफलमितिप्रोक्तासर्वगंधाःसदाबुधैरिति॥हेमाद्रौगा
रुडे॥कर्पूरंचंदनंदर्पःकुंकुमंचसमांशके॥सर्वगंधमितिप्रोक्तंस
मस्तसुखवल्लभमिति॥भद्रासनमुपविष्टोयजमानऋत्विक्भि
र्गृह्योक्तविधिनास्वस्तिवाचनंकुर्यात्॥तत्रजीवत्पतिपुत्राभिःसुवे
षाभिस्त्रीभिर्नीराजितस्ताभ्यःसकंचुकानिवस्त्राणिदद्यात्॥तत
आचार्योयजमानंदक्षिणतउदङ्मुखंस्थिष न्ऋत्विग्दत्तपूर्वादिकुं
भमंत्रयेणऋमेणैकैकमंत्रेणस्नपयेत्॥सहस्राक्षंशतधारमृषिभिः

६ पावनंकृतं॥तेनत्वामभिषिंचामि पावमान्यःपुनंतुते॥भगंतेवरुणो
राजाभगंसूर्योबृहस्पतिः॥भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः॥
यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि॥ललाटेकर्णयोरक्ष्णोरापः
त स्तद्घ्नंतुसर्वदा॥उत्तरकलशेमंत्रत्रयसमुच्चयइति॥हेमाद्रिमहार्ण
त्र वमितासराकृन्मतं॥प्रतिकलशंमंत्रैर्यावृत्तिरित्यपरार्कः॥ततश्चतुर्भिः
र्मीलितैःकलशैःसत्विक्कृद्धृतेबृहसराशरोक्तैःमंत्रैरभिषेकंकारयेत्॥ ॥६॥
मंत्रान्स्वयंपठेदाचार्यःएतद्दैपावनंमहस्त्रास्समृषिस्मृतं॥तेनत्वाशा

प्रोक्तं

तधारेणपावमान्यःपुनंत्विमाःशाक्तादिशेदेदिक्पालाब्रह्मेशाःकेशवा
दयः॥आपस्तेघ्नंतुदौर्भाग्यंशांतिंददतुसर्वदा॥सुमित्र्यानआपओषध
यः संतुदुर्मित्र्यास्तस्मै संतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥समुद्रागि
रयोनद्योमुनयश्चपतिव्रताः॥दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयछंतुसर्व
दा॥पादगुल्फोरुजंघास्थिनितंबोदरनाभिषु॥स्तनोरोबाहुहस्ताग्र
ग्रीवाअंसांगसंधिषु॥नासालललाटकर्णभ्रुकेशांतेषुचयस्थितं॥
तदापोघ्नंतुदौर्भाग्यंशांतिंयछंतुसर्वदेति॥ततआचार्य उपविश्य

सव्यपाणिगृहीतकुशात्रयांतर्हितेयजमानमूर्धनिओम्दुंबरेपात्रुवेण
सार्षपंतेलंजुहुयात्॥ॐमिनायस्वाहा॥१ॐसंमिनाय॥२॥ॐशा
लाय०३ ओंकटंकटाय०४ कूष्मांडाय॥५॥राजपुत्रायस्वाहेति॥यथा
मंत्रलिंगत्यागंयजमानःशालंकटंकटायकूष्मांडराजपुत्रायेतिसमा
सांगीकारेणाहुतिचतुष्टयमपरार्कः॥ततइध्माधानादिमिनादिषण्मे
त्रैरग्नावदानधर्मेणहोमःव्योमकेशायस्वाहेत्येवंपंचदशाहुतय ॥७॥
घृतनस्विष्टकृदादिपूर्णपात्रनिनयेंसंस्रुजांतंकृत्वाचरुशेषेणा

भिषेकशालायांलोकपालेभ्योबलिंदद्यात्॥ॐइंद्रायनमः॥ईशानाय
नमः॥इत्यष्टदिक्षु॥ब्रह्मणेनमः॥अनंतायनमः॥इतिईशानपूर्वयोर्म
ध्येबलिद्वयं॥अथयजमानः सुस्नातः सुक्लानुलेपनमाल्यांबरधर
आचार्यसहितस्तीर्णकुशेसूर्यंनिहितमुदुंबरंगायत्र्याविनायकायेतमु प
पहारंनिवेदयामीत्यंतयाविनायकायनिवेदयेत्॥सकृदवहतास्तंडुला
स्तिलपिष्टमिश्रौदनःपक्वमस्याः॥३॥अपक्वाः॥३॥माषविकारास्तैरा
कारावापक्वमपक्वंचमांसंतादृग्माषविकारोवाचित्रंसुगंधिपु

ष्यं चंदनादि सुगंधिद्रव्यं त्रिविधासुरा॥ गुडमधुपिष्टमिश्राणि ससैंध
वानि पात्रत्रयस्थितानि क्षीरापिवा॥ मूलकं१ पूरिकाः॥ अपूपाः॥३ ॐ
डेरकास्त्रयः॥ दध्योदनः॥ पायसं गुडमिश्रं तंडुलादिपिष्टं॥ लड्डुकाइत्युप
हारः॥ ईदृशमेवोपहारं अंबिकागायत्र्यांबिकायै एतमुपहारं निवेदया
मीत्यंतयांबिकायैनिवेदयेत्॥ ततआचमनफलतांबूलदक्षिणानीरा
जनपुष्पांजलिभिरभ्यर्च्यशिरसाभूमिंगत्वोक्तगायत्रीभ्यांविनायक ॥८॥
मंबिकांचनमस्कुर्यात्॥ गंधपुष्पदूर्वासर्षपयुतेनकुसुममात्रयुतेन

वोदकेनांजलिमापूर्य पूर्वोक्तगायत्रीभ्यामर्घ्योदत्वादूर्वासर्षपपुष्प
पूर्णांजलीनाभ्यांदत्वाविनायकमुपतिष्ठेत॥ रूपंदेहियशोदेहिभगंभ
गव देहिमे॥ पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमेइतितत्तोरूपं॥९॥
भगवतिदेहिमइति यथापाठमंत्रेणांबिकामुपतिष्ठेतेतिमहार्णवः॥
बृहत्सरासरेणोपस्थानेमंत्रांतरमुक्तं॥ सौभाग्यमंबिकेदेहिरूपंभ
गंयशोपिवा॥ स्त्रियःपुत्रांश्चकामांश्चतथाराज्यंचदेहिमे॥ गृणोत्रामा
तरंबालेयत्किंचिन्मदभीप्सितं॥ एकनाम्नेवतदेहिदेहिगौरिवरा

न्ममेति॥ ततआस्तीर्णकुशेशूर्पेसर्वप्रकारमुपहारशेषंनिधायचतु
ष्पथमुवमुपलिप्यतत्रगुरुःशूर्पंनिदध्यात्॥यजमानःप्रक्षालितपा
दआचांतोमंत्रोक्तदेवताभ्योबलिंदद्यान्मंत्राः॥बलिंगृह्णंत्विमेदेवा
आदित्यावसवस्तथा॥मरुतोयाश्विनोरुद्राःसुपर्णाःपन्नगाग्रहाः॥अ
सुरायातुधानाश्चपिशाचामातरोनगाः॥शाकिन्योयक्षबेतालायोगि
न्यःपूतनाशिवाः॥ढुंढकाःसिद्धगंधर्वामायाविद्याधरानराःदिक्पाला
लोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांतिकर्त्तारोब्रह्माद्याश्च ॥९॥

महर्षयः॥माविघ्नोमाचमेपापंमासंतुपरिपंथिनः॥सौम्याभवंतुतृप्ता
श्चभूतप्रेताःसुखावहाः॥इतितंतोयजमानोगृहंगत्यप्रक्षालितपाद मा
आचम्याचार्यंसंपूज्यसदक्षिणंवस्त्रयुग्मंदद्यादृत्विग्भ्योपियथाशक्ति
हेमदक्षिणांदद्यात्॥अन्येभ्यश्चभूयसींदद्यात्॥स्थापितदेवतानामुत्त
रपूजाविसर्जनपूर्वकमाचार्यायसमर्पणंविधायपरिस्तरणविसर्ज
नादिविभूतिधारणांतंकृत्वा॥गच्छगच्छयज्ञंविसृज्यदशावरान्ब्राह्म
णान्भोजयेदीश्वरार्पणंकुर्यात्॥विवाहाद्यारंभेविवाहकर्मणोनि

१० र्विघ्नफलसिध्यर्थमित्येवंसंकल्पवाक्योरुः॥एवमुपसर्गनिवृत्तिका
मः॥श्रीकामइतिवान्यत्रतदूहोबोध्यः॥इतिवैनायकीशांतिःसमवाप्ति
यथामति॥अनंतेनभवेद्देव्यागणेशंबिकयोर्मुदे॥अपरार्कमतेकल
शपूजांतेव्योमकेशादिदेवतापूजनं॥ततउत्सादनादिसंस्कृतस्योपवे
शनं॥ततःसहस्रास्सःइतिमंत्रत्रयावृत्त्याचतुर्भिः कलशैरभिषेकः॥
ततोमित्रायस्वाहेतिचतुर्भिर्मंत्रैस्तैलहोमः॥तैरेवचतुर्भिः मंत्रैश्चतु ॥१०॥
ष्पथबलिदानं॥ततोर्घ्यदानमुपस्थानं॥ततःशुक्लवस्त्रादिधारणं॥

ब्राह्मणभोजनंगुरवेवस्त्रयुग्मदानंगुरुवसूजनंचेतिप्रयोगः॥अत्रोप
कल्पनश्लोकामहार्णवे॥अथोच्यतेत्रसंभारारोचनापंचमृत्तिकाः॥
अश्वस्थानाद्द्विजस्थानाद्वल्मीकाद्वृद्धसंगमात्॥चंदनागरुकस्तूरि क
र्पूराद्याःसुगंधयः॥गोरसर्षपकल्कस्तुगव्याज्येनविमिश्रिताः॥गुग्गु
लुश्चापिसंशुद्धःसर्वौषधिगणस्तथा॥ चत्वारःकलशाएकव
र्णाश्चास्फुटितव्रणाः॥ह्रदोदकयुतावापिनिम्नगासंगमोदकाः॥
सग्रीवापुच्छमारुंचर्मचानडुहंतथा॥श्रीपर्णीकाष्ठपीठंचसहका

११ रश्वपत्रवाः॥ अश्वत्थपलवावास्युः सुगंधिसुमनांस्यपि स्रजः शोभ
नगंधाश्च विचित्रकुसुमानिच॥ कलशवेष्टनार्थंतुनववस्त्रचतुष्टयं॥
पीठस्याछादनार्थंतुशुभ्रवस्त्रमथापरं॥ गणेशांबिकयोरर्थेवस्त्रयु
गंसुशोभनं॥ आचार्यदक्षिणार्थंतुमहार्हंवसनद्वयं॥ पंचवर्णानिपि
ष्टानिस्वस्तिकस्यविनिर्मितैः॥ तैलंचसार्षपंतद्वदुदुंबरविनिर्मितः॥
स्रुवःकुशांश्चरुस्थालीपाकार्थंतंदुलाःशुभाः॥ किंचिदुत्तिक्रियाप्रा ॥११॥
स्तास्तिदुलाश्चापरेतथा॥ तिलपिष्टेनसंयुक्तओदनःसूपमेवच॥

पक्काश्वमस्याश्वापक्वामांसंपक्वमपक्वकं॥ गौडीपैष्टीतथामाध्वी
एवंचत्रिविधासुरा॥ मस्यादिकंसुरांतंचनिषिद्धंयस्ययच्चतत्॥ न
ग्राह्यंतुविशेषेणद्विजैस्याज्यासुरासदा॥ यजमानस्तुसूदश्चेदीक्षे
स्तांनियोजयेत्॥ मत्स्यसमूलकंवास्यादुत्तमस्तेयथाकृतिः॥ अपूपा
पूरिकाश्चैवतथैवोंडकरस्रजः॥ दध्यन्नंपायसंचैवपिष्टंचगुडमिश्रि
तं॥ लड्डुकाश्चतथादूर्वासर्षपागौरसंज्ञिताः॥ गणेशप्रतिमाचैवगो
र्यास्चैवप्रतिमातथा॥ एवंसभृतसंभारःशांतिंकुर्याच्छुभेदिने॥ ॥

इतिविनायकशांतिः॥ ॥एतत्संभवेउपनयनकालेचबृहस्पत्यानुकूल्याभावेतच्छांतिःकार्या॥उक्तेपिवर्षेनबलीगुरुश्चेच्छांत्याप्रत्यस्तंप्रतिबंधकर्मेतिवृद्धवसिष्ठोक्तेः॥तामाहयौनकः॥कन्यकोद्वाहकालेतुआनुकूल्येनविद्यते॥ब्राह्मणस्योपनयनेगुरोर्विधिरुदाहृतः॥सुवर्णेनगुरुंकृत्वापीतवस्त्रेणवेष्टयेत्॥ईशान्यांधवलंकुंभंधान्योपरिनिधायच॥दमनंमधुपुष्पाणिपत्रपालाशमौर्षपान्॥मांसीगुडूच्यापामार्गविडंगंशंखिनीवचा॥सहदेवीविधुक्रांतासर्वौषधीशतावरी॥कुंभेनिक्षिपेदि ॥१२॥

तिशेषः॥कृत्वाज्यभागपर्यंतंस्वशाखोक्तविधानतः॥ग्रहोक्तमंडलेक्यर्च्चापीतपुष्पास्तताहिभिः॥देवपूजोत्तरेकालेततःकुंभानुमंत्रणं॥अश्वत्थसमिधश्चाज्यंपायसंसर्षिषायुतं॥यवव्रीहितिलाःसाज्यामंत्रेणैवबृहस्पतेः॥अष्टोत्तरशतंहुत्वाहोमशेषंसमापयेत्॥पुत्रदारसमेतस्यअभिषेकंसमाचरेत्॥कुंभाभिमंत्रणोक्तैश्चसमुद्रज्येष्ठमंत्रतः॥प्रतिमाकुंभवस्त्रंचआचार्यायनिवेदयेत्॥ब्राह्मणान्भोजयेत्पश्चाद्धुनंदद्यान्नसंशयः॥ ॥इतिबृहस्पतिशांतिः॥तथामदनरत्नेस्कांदे॥गुरुपूजो

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

१३ क्वांकन्या विवाहकालेतु गुरोः शुद्धिर्न विद्यते॥ बालस्योपन यने
न यस्यस्यादुस्थिता गतः॥ दुस्थितंदुष्टस्थानमष्टमादिआगतोगुरु रिति
रोषः॥ तदापूजा गुरोः कार्या विधिवद्भक्तिभावितैः॥ मदंतीकामपुष्पाणि
पत्रंपालाशसर्षपाः॥ मदंतीयूथिकाकामोमदनः॥ गुडूची थाप्यपामा
वि र्गंबिडंगंस्रंखिनीवचा॥ सहदेविंधुक्रांता सर्वौषध्यःशतावरी॥ कुष्ठंमां
२ रा सीहरिद्रेद्वेमुस्तेचेलेयचंदनं॥ वचाकचोरमुस्तंचसर्वौषध्यःप्रकीर्तिताः॥ ॥९३॥
तथैवाश्वत्थपंचांगाश्चपंचगव्यंजलंतथा॥ नूतनंसोरकुंभंचपीतवस्त्र

समन्वितं॥ पंचरत्नैःसमायुक्तमीशान्यांस्थापयेत्ततः॥ याऽओषधी
तिमंत्रेणसर्वास्तस्मिन्विनिःक्षिपेत्॥ कुंभस्योपरिभागेतुस्थापयित्वाबृ
हस्पतिं॥ सुवर्णपात्रेसोवर्णीप्रतिमांतुयुधिष्ठिर॥ कारयेत्तुयथाशक्त्यावि
त्तशाठ्यविवर्जितः॥ पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीं॥ पूजयेद्गं
धपुष्पाद्यैस्ततोहोमंसमाचरेत्॥ समिधोऽष्टशतंहोम्याअष्टोत्तरं
शतं॥ तिलव्रीहियवैर्मिश्रंहोतव्यंचयथाक्रमं॥ अनेनगृह्यसूत्रदृष्ट
स्यसमिद्धो मानंतरभाविनश्चवाज्यहोमस्यानंतरमागंतुरयंहोमः

१४ कार्यइतिस्थापयते॥बृहस्पतेतिमंत्रेणऋषिछंदसमन्वितं॥ततोहोमा
वसानेतुपूजयेच्चबृहस्पतिं॥पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चभक्तितः
दध्योदनंचनैवेद्यंफलंतांबूलसंयुतं॥नमअंगिरसांनाथवाक्पतेय
बृहस्पते॥क्रूरग्रहैःपीडितानामरितापनमोनमः॥पूजयित्वासुरान्वा
र्यंपश्चाद्घ्यंनिवेदयेत्॥गंभीरबुद्धरूपांगदेवेज्यसुमतेप्रभो॥नम
स्तेवाक्पतेशांतगृहाणार्घ्यंबृहस्पते॥अर्घ्यंदत्वासुरशायजपहोमंस ॥१४॥
मर्पयेत्॥भक्त्यायतेसुराचार्यहोमपूजादिसत्कृतं॥ततंगृहाणशां

स्यंबृहस्पतेनमोनमः॥मंत्रेणानेनसंकल्प्यपश्चात्संप्रार्थयेन्नृप॥
जीवोबृहस्पतिःसुरिराचार्योगुरुरंगिराः॥वाचस्पतिर्देवमंत्रीश्रु
मंकुर्यात्सदाममा॥सर्वेपिचारसंयुक्तांप्रतिमांतांयुधिष्ठिर॥पूर्ण
म्यचगवायुक्तामाचार्यायनिवेदयेत्॥अथाचार्यस्तुनियतोवेदवेदां
३५ गपारगः॥यजमानंसौम्यंशांतचित्तोजितेंद्रियः॥कुंभोदकंगृहीत्वा
चमंत्रैरेतैःसचिंतयेत्॥इदमापोथमंत्रेणतामग्निरित्यृचातथा॥या
ओषधीरश्वावतीःकूष्मांडैश्चाभिषेचयेत्॥पश्चात्संभोजयेद्विमा

न्यथाक्लेशे युधिष्ठिर॥ संक्रांतावपि कौंतेय तथास्वाभ्युदयेषुच॥ कुर्वन्कृ
तस्यतेः पूजामभीष्टफलमाप्नुयादिति संक्रांतौ गुरोः॥ इति स्कांदोक्ता गुरु
पूजा॥ ॥अत्रचरौनको क्तौ स्कांदोक्तौ च शाकपालेका
दशकपालादि भेदस्येव यूथिकासरसत्वादिप्रयुक्ते ष्वेलस्पर्शे पि
कर्मभेदकत्वा संभवादुभय गतगुणोपसंहारेण कुंकुमानुमंत्रणादि
साधारणधर्माणां दीर्घचतुरस्रमंडलाद्यसाधारणधर्माणांवि नियोग
वशेनापेक्षितानांग्रहमस्वास्वीकारेणतावद्भिरेवगृहमेधीयवन्नेरा

कांस्यसंभवेनाविनियुक्ततत्रत्यधर्मा नारेणप्रयोगं वदामः॥ अ
स्यकुमारस्यापनयनकाले बृहस्पत्यनुकूल्यसिद्धि द्वाराश्रीपरमेश्व
रप्रीत्यर्थं बृहस्पतिशांतिं करिष्य इतिसंकल्यगणेशपूजनाद्या चा
र्यवरणांतंकुर्यात्॥ ततआचार्यःकर्षतद्धार्यादिपरिमितहेम्नायथाश
क्तिनिर्मितप्रतिमायाअग्न्युत्तारणंकृत्वायत्रसंस्थितमित्यादिदेश सं
स्कारांतेहोमदेशस्येशानदेशेमहीद्यौरितिस्पृष्ट्वामृत्तिकौषधयःसं
निधान्यंप्रक्षिप्याकलशोस्थिति धवलकुंभंस्थाप्येमंमेगंगइतितीर्थो

१६ दकेनापूर्य्याश्वत्थेवइतिअश्वत्थपल्लवान्॥गायत्र्यादिमंत्रैःपंचगव्यंदे
वस्यत्वांमभिषिंचामीतिकुशोदकंक्षिप्ययुवासुवासाइतिवस्त्रेणसं
वेष्यसहिरत्नानीतिपंचरत्नानिप्रक्षिप्ययाऽओषधीरितिवक्ष्यमा
ओषधीन् णांसर्वान्क्षिपेत्॥यूथिकादमनमधुपुष्पाणिपत्रंभाषायां॥पत्रज
मितिप्रसिद्धं॥पलाशंसर्षपान्जटामांसीगुडूचीअपामार्गंविडंबांश
रिवनीवचां॥सहदेवींविष्णुक्रांतांशतावरींकुष्ठंहरिद्रेद्वेमुरांशैलेयंच ॥१६
दनंवचांकचोरंमुस्तांचेति॥ततश्चंदनादि नाकुंकुममभ्यर्च्यपूर्णादवीति

यथाविभवंसोवर्णादिपूर्णपात्रंनिधायतन्नाष्टदलेतरदलेहरितास्तत
निर्मितदीर्घचतुरस्रपीठेहेमीबृहस्पतिप्रतिमांस्थापयित्वास्थंडिलेग्नि
प्रतिष्ठापनादिअन्वाधानेचक्षुषीआज्येनेत्यंतेबृहस्पतिमद्योनरशातसं
ख्याभिरश्वत्थसमिद्भिस्तावतीभिःसर्पिर्मिश्रपायसाहुतिभिःतावतीभिः
साज्ययवव्रीहितिलाहुतिभिश्चौषेणस्विष्टकृतमित्यादिस्वशाखोक्त
विधिनाज्यभागांतंकृत्वाकुंभोपरिस्थापितप्रतिमायामावाहनादिषोडशो
पचारैर्बृहस्पतिंपूजयेत्तत्रविशेषाः॥पीतवस्त्रयुग्मंपीतयज्ञोपवीतंपीत

+स्तावतीभि राज्याहुतिभिस्तावतीभिः सर्पिर्मिश्रपायसाहुतिभिःतावतीभिःसाज्ययवव्रीहि+
+तिलाहुतिभिश्चौषधपंक्ति ४ र्पि

१७ चंदनं पीताक्षतान्॥चंपकादिपीतपुष्पं बिल्वमज्जाधूपं घृतदीपं दध्योदनं
नैवेद्यं॥दक्षिणायां पुष्यरागमाणिक्यं यथाशक्ति हेमवा॥पूजां तेआङ्गिरसामि
३ कल्प वर्सूणीभिः पावमानीभिश्च ग्रहमखोभिः कुंभानुमंत्रणं॥ततोयजमानोय
थान्वाधानं बृहस्पतइंनममेतित्यागंकुर्यात्॥अथाचार्यो बृहस्पतिमं
त्रेणप्रणवादिनास्वाद्यादिस्मरणपूर्वकंदधिमधुक्ताष्टोत्तरशतमाज्यस
मिधोजुहुयान्नावतीराज्याहुतीःसर्षपैश्चलोकसिद्धपायसाहुतीःसाज्य ॥१७॥
यवव्रीहितिलाहुतीश्चततःस्विष्टकृदादिशेषंपरिस्तरणविसर्जनाग्न्य

र्चनांतंकुर्यात्॥ततोबृहस्पतेर्गंधादिभिःपूर्वोक्तैःफलतांबूलांतैःपूजनं
कुर्यात्॥सयजमानोनमस्कुर्यात्ततस्तास्त्रपात्रेशुद्धोदकंप्रक्षिप्यतत्रपी
तानिगंधाक्षतपुष्पाणिफलंचप्रक्षिप्यार्घ्यंदद्यात्॥गंभीरदृष्टरूपांगरे
वेज्यसुमतेप्रभो॥नमस्तेवाक्पतेशांतगृहाणार्घ्यंनमोस्तुते॥ततोयज
मानोबृहस्पतयेकृतकर्मार्पणंकुर्यात्॥मन्त्रायत्तेसुराचार्यहोमपू
जादिसत्कृतं॥तत्त्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमइतितनःप्रार्थ
येत्॥जीवोबृहस्पतिःसुरिराचार्योगुरुरांगिराः॥वाचस्पतिर्ईवमंत्री

शुभंकुर्यात्सदाममेति॥ ततोविसर्जनंकृत्वाचार्यंप्रणम्यसर्वौषधसं
युक्तांगोयुक्तांइमांप्रतिमांतुभ्यमहंसंप्रददेइतितादृशप्रतिमांदद्या
दभिषेकोत्तरंवासनं॥ कुंभोदकेनाचार्यःपुत्रदारसमेतंयजमानमभि
षिंचेदापोहिष्ठेतितिसृणांअंबरीषःसिंधुद्वीपआपोगायत्री॥ तत्त्वाय
मीतितिसृणांशुनःशेपोवरुणस्त्रिष्टुप्॥ स्वादिष्ठयेतितिसृणांमधुछंदाः
पवमानसोमोगायत्री॥ समुद्रज्येष्ठाइतिमंत्राणांवसिष्ठआपस्त्रिष्टुप्॥ ॥१८॥
इदमापइत्यस्यसिंधुद्वीपआपोनुष्टुप्॥ तामग्निवर्णामित्यस्यहिरण्य

गर्भोदुर्गात्रिष्टुप्॥ याओषधीरित्यस्यभिषगोषधयोनुष्टुप्॥ अश्वा
वतीर्गोमतीरित्यस्यवसिष्ठऊषास्त्रिष्टुप्॥ यद्देवादेवहेडनंयद्दी
व्यमायुष्टेविश्वतोदधदित्यापस्तंबशाखोक्तैरनुवाकैरभ्युक्षेयो
रावृणीमहइति॥ ततोयथाशक्तिब्राह्मणान्भोजयेदितिकोस्तुभेव
हस्पतिशांतिः॥ ॥

श्री

यादिविनायकशांतिसाहित्य

गोरोचन
पंचमृत्तिका
अश्वस्थान
गजस्थान
वल्मीक
ह्रद
संगम
चंदन
अगरु
कस्तूरि
कर्पूर
गोरसर्षप
कल्कगव्याज्य
विमिश्रित
गुग्गुलु
सर्वौषधिगण
४ कलश
आनडुहचर्म
श्रीपर्णीपाट
चूतपल्लव
अश्वत्थपल्लव
सुगंधिपुष्प
सुगंधिगंध
विचित्रपुष्प

४ कलशवेष्टनवस्त्र
१ पीठाछादनशुभ्रवस्त्र
२ मुख्यदेवतावस्त्र
३ आचार्यवस्त्र
पंचवर्णपिष्ट
सर्षपतैलं
उदुंबरस्रुव
कुंभा
तंडुळस्थालीपाकार्थ
अपरतंडुल
तिलमिश्रओदन
पूर्ण
मत्स्यपक्व
मत्स्यअपक्व
मांसपक्व
मांसअपक्व
सुरात्रिविधा
गोडीपेष्टीमाधी
मूलक
अपूप
पूरिका
उडेरकस्रज
दध्यन्न

LIBRARY OF THE BOMBAY ASIATIC SOCIETY

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पायस
गुडाभिश्रपिष्ट
लड्डुक
दूर्वा
गोरसर्षप
गणेशप्रतिमा
देवीप्रतिमा
४ पूर्णपात्र
सर्वौषधिगणस्तु
वाळा
शंखपुष्पी
कुष्ठी
वचा
नागकेसर
एतानिचूर्णानि
मतांतरे
कुष्ठं मांसी
हरिद्रे
रजनीद्वयं
सटी
चंपक
मुस्ता
सर्वगंधा
कुंकुमअगरु
कर्पूर कस्तूरि

चंदन
जातीफल
मतांतरे
कर्पूरचंदन
कस्तूरिकुंकुम

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH